# निरुक्तम् –

## तृतीयोऽध्यायः

शास्त्री प्रथमवर्षस्य छात्राणां कृते – द्वितीयसत्रार्धवार्षिकपत्रम्

(लघूत्तरीयप्रश्नाः)

(1) निरुक्ते कति काण्डानि सन्ति ?
उत्तरम् → त्रीणि काण्डानि सन्ति।

(2) निरुक्तस्य कर्ता कः ?
उत्तरम् – आचार्य यास्कः।

(3) निरुक्ते कति अध्यायाः सन्ति ?
उत्तरम् – द्वादश अध्यायाः एवञ्च द्वौ परिशिष्टौ स्तः।

(4) निरुक्तस्य द्वितीयाध्याये कति पादाः सन्ति ?
उत्तरम् – सप्तपादाः सन्ति।

(5) निरुक्तग्रन्थस्य तृतीयाध्याये कति पादाः सन्ति ?
उत्तरम् चत्वारः पादाः सन्ति।

(6) निरुक्तस्य तृतीयोऽध्यायः कस्मिन् काण्डे अन्तर्भवति ?
उत्तरम् – निघण्टुकाण्डे।

(7) निर्वचनस्य सिद्धान्तः कुत्रोऽपलभ्यते ?
उत्तरम् – निरुक्तशास्त्रे।

(8) निर्वचनं नाम किम् ?
उत्तरम् – निर्वचनं निरुक्तम्।

(9) कर्म-नामानि कति ?
उत्तरम् – षड्विंशतिः

(10) कर्म कस्मात् ?
उत्तरम् – क्रियत इति सतः।

(11) अपत्यं नाम कति ?
उत्तरम् → पञ्चदश।

(12) रायः इति पदस्य कोऽर्थः
उत्तरम् → धनम्।

(13) रेक्णः शब्दस्यार्थः कः ?
उत्तरम् → रेक्णः इति धन-नाम।

(14) अभीषाट् इति पदस्य कोऽर्थः ?
उत्तरम् → शत्रुः

Scanned with CamScanner

(15) "नहि ग्रभाय" इति वाक्यस्य किं तात्पर्यम् ?
उत्तरम् → नहि ग्रहीतव्यः ।

(16) दाय भागस्य अधिकारी कः भवति ?
उत्तरम् → अविशेषेण मिथुनाः पुत्रा दायादा इति ।

(17) "आत्मा वै पुत्रनामासि स जीव शरदः शतम्" इति कुत्रोऽपलभ्यते ?
उत्तरम् → शतपथब्राह्मणे (14|9|4|26)

(18) "अभ्रातृमतीवादेनसह कस्य सम्बन्धः ?
उत्तरम् → भ्रातृ रहिता कन्या ।

(20) 'योषा' इति शब्दस्यार्थ कः ?
उत्तरम् – नारी पर्यायवाचिनः योषा शब्दः ।

(21) "गर्त" पदस्य अर्थ कः ?
उत्तरम् गर्तः सभा-स्थाणुः ।

(22) शरीर कस्मात् ?
उत्तरम् → शरीरं शृणातेः । शम्नातेर्वा ।

(23) मनुष्यः कस्मात् ?
उत्तरम् → मत्वा कर्माणि सीव्यन्ति । मनस्यमानेन सृष्टाः ।

(24) "पञ्चजना मम होत्रं जुषध्वं" उक्त औपमन्यवमतानुसार "पञ्चजना" के ?
उत्तरम् → चत्वारः वर्णाः पञ्चम निषाद इति औपमन्यवः ।

(25) ऊर्क् इति शब्दः कस्य वाचकः ?
उत्तरम् → ऊर्क् इति अन्ननाम ।

(26) बाहोः कति नामानि सन्ति ?
उत्तरम् → द्वादश ।

(27) "प्रबाधत आभ्यां कर्माणि" इति कस्य निर्वचनम् ?
उत्तरम् → बाहोः ।

(28) " अग्र-कारिण्यो भवन्तीति वा ?
उत्तरम् → अङ्गुलयः ।

(29) "दृषमपीतरा ध्रूः" इत्यत्र "ध्रूः" शब्दे कः धातुः ?
उत्तरम् → वधार्थक "धुर्वी" धातोः निर्वृत्तः ।

(30) अन्नं कस्मात् ?
उत्तरम् → आनतं भूतेभ्यः । अत्तेर्वा ।

(31) बलं कस्मात् ?
उत्तरम् → बलं भरं भवति ।

Scanned with CamScanner

(32) "डुभृञ्" धातुः कस्मिन् अर्थे प्रयुज्यते ?
उत्तरम् → धारण-पोषणयोः ।

(33) धननामानि कति ?
उत्तरम् – अष्टाविंशतिः ।

(34) "धिनोतीति सतः" इति कस्य व्युत्पत्तिः ?
उत्तरम् → धनम् ।

(35) कति क्रोध नामानि ?
उत्तरम् → एकादश ।

(36) कति क्षिप्र नामानि ?

उत्तरम् — षड्विंशतिः ।

(37) "सांक्षिप्तो विकर्षः ?

उत्तरम् — क्षिप्रः ।

(38) व्याप्ति कर्माणः कति धातवः ?

उत्तरम् दश (10)

(39) "आखण्डल प्रह्वयसे" इत्यस्य किं तात्पर्यम् ?

उत्तरम्. यः खण्डयितः मेघान् स आखण्डयिता तस्य सम्बोधनम्। हे आखण्डयितः इन्द्रः आह्वयसे त्वम् ।

(40) अरातयः इति पदस्यार्थः कः ?

उत्तरम् → शत्रुः ।

(41) "तडितः" शब्दस्यार्थः कः ?

उत्तरम् → निकटस्थः ।

(42) वज्र किमुच्यते ?

उत्तरम् → वर्जयति वियोजयति प्राणैः प्राणिनः इति वज्रमुच्यते ।

(43) कति वज्र नामानि ?

उत्तर → अष्टादश ।

(44) "वर्जयतीति सतः" ?

उत्तरम् → वज्रः ।

(45) ईश्वर नामानि कति ?

उत्तरम् → चत्वारः ।

(46) ह्रस्वः कस्मात् ?

उत्तरम् ह्रस्वो ह्रसतेः ।

(47) ह्रस्वः कस्मिन् अर्थे प्रयुज्यते ?

उत्तरम् → न्यूनार्थक ।

(48) ह्रस्व शब्दे कः धातुः ?

उत्तरम् → "ह्रस्" धातुः

Scanned with CamScanner

(49) आचार्य शाकपूणि मतानुसारं महान् शब्दस्य का व्युत्पत्तिः ?

उत्तरम् → मानेनान्यान्जहातीति शाकपूणिः।

(50) कति गृह नामानि ?

उत्तरम् → द्वाविंशतिः।

(51) सुख नामानि कति ?

उत्तरम् – विंशतिः।

(52) "सुहितं खेभ्यः" कस्य निर्वचनम् ?

उत्तरम् – सुखस्य।

(53) "खम्" शब्दः कस्य वाचकः ?

उत्तरम् → खम् इन्द्रियस्य वाचकः।

(54) रूपं रोचतेः इत्यत्र रूपं इति पदे कः धातुः ?

उत्तरम → ~~रु~~ रुच् धातुः।

(55) सत्यं कस्मात् ?

उत्तरम् → सत्सु तायते। सत्प्रभवं भवति इति वा।

(56) यदतत्तत्सदृशमिति उपमाः इति कस्य मतम् ?

उत्तरम् – गार्ग्यस्य।

(57) "वनर्गू" इति पदस्य कोऽर्थः ?

उत्तर → वनगामिनौ इति।

(58) 'द्वितीयो वर' उच्यते इति ?

उत्तरम् – देवरः ।

(59) मर्मः पदस्य कोऽर्थः ?

उत्तरम – मर्मः मनुष्यः ।

(60) "भ्राजन्तो अग्नयो यथा" इत्यत्र कीदृशः उपमा ?

उत्तरम् – कर्मोपमा ।

(61) 'आत्मा अततेः' इत्यत्र 'अत' कस्मिन् अर्थे प्रयुज्यते ।

उत्तरम् – ~~अत~~ 'अत' सातत्य गमने ।

(62) अग्निरिति इत्यत्र का उपमा ?

उत्तरम् – ~~[illegible]~~ रुपोपमा ।

(63) वदिति इत्यत्र का उपमा ?

उत्तरम् – सिद्धोपमा ।

(64) सिंहो व्याघ्र इति कस्मिन् अर्थे प्रयुज्यते ?

उत्तरम – पूजायाम ।

(65) श्वा काक इति कस्मिन् अर्थे प्रयुज्यते ?

उत्तरम् – कुत्सायाम ।

(66) सिंहः कस्मात् ?

उत्तरम् – हिंसेर्वा स्याद् विपरीतस्य । संपूर्वस्य वा हन्तेः । संहाय हन्तीति वा ।

Scanned with CamScanner

(67) "मेधा मतौ धीमते" इति ?

उत्तरम् – मेधावी

(68) ~~[illegible]~~ यास्का कर्मणः इति धातवः ?

उत्तरम् → सप्तदश (17)

(69) कूपानं भवति इति ?

उत्तरम् → कूपः ।

(70) दूरं कस्मात् ?

उत्तरम् → द्रुतं भवति दुरयं वा ।

(71) पुरा नवं भवति इति ?

उत्तरम् – पुराणम् ।

प्रकाश रंजन मिश्र

जयपुर - परिसर

Scanned with CamScanner